योगतन्त्र-ग्रन्थमाला

(३)

प्रधानसम्पादकः

बदरीनाथशुक्लः

सञ्चालकः

अनुसन्धानसंस्थानम्

वाराणसेयसंस्कृतविश्वविद्यालयः, वाराणसी।

तन्त्रसंग्रहः

[प्रथमो भागः]

सवृत्तिका विरूपाक्षपञ्चाशिका, सटीका साम्बपञ्चाशिका,
सव्याख्यं त्रिपुरामहिमस्तोत्रम्, स्पन्दप्रदीपिका, अनुभवसूत्रम्,
वातुलशुद्धाख्यतन्त्रं च

सम्पादकः

म० म० गोपीनाथकविराजमहोदयः

योगतन्त्रविभागाध्यक्षः

वाराणसेयसंस्कृतविश्वविद्यालयः, वाराणसी।

वाराणस्याम्

२०२७ विक्रमसंवत्सरे] १८९२ तमे शकाब्दे [१९७० ख्रीस्ताब्दे

आद्यमावेदनम्

महामहोपाध्यायपण्डितप्रवरश्रीगोपीनाथकविराजमहोदयानामाध्यक्ष्ये प्रवर्तमानस्य योगतन्त्रविभागस्य स्तुत्येन प्रयासेन सङ्कलनसम्पादनाभ्यां प्रकाशनं नीयमानान् षडागमग्रन्थान् प्रस्तुतसंग्रहात्मना तन्त्रविद्याविपश्चितां पुरत उपहरतो मे मानसं निरतिशयानन्दसन्दोहेन सम्पूर्यमाणमास्ते, तत्र संग्रहान्तर्गतग्रन्थानामध्ययने विद्वज्जनानां निष्कम्पप्रवर्तनमभिलक्ष्य क्रमेण कश्चन संक्षिप्तो विषयपरिचयस्तेषामत्रोपनिबध्यते।

विरूपाक्षपञ्चाशिका

'विरूपाक्षपञ्चाशिका'शब्दो विरूपाक्षस्य पञ्चाशिकेति व्युत्पत्त्या पञ्चाशिकाशब्देन तन्नामकं शास्त्रं विरूपाक्षशब्देन तत्कर्तारं च बोधयति, विरूपाक्षो हि परमशिवभट्टारकस्य विश्वानुग्रहसम्पिपादयिषामूलको विरूपाक्षनाथपादनामाऽवतारः। स हि दिविषदां नाथस्यागमविद्यारहस्यविबोधनाय समस्तसंवित्सिद्धान्तार्थभूतं पञ्चाशिकानामकं शास्त्रं रचयामास, तच्च शास्त्रं स्कन्धचतुष्टये विततम्।

प्रथमे स्कन्धे 'विमतिपदमङ्ग सर्वम्' इत्याद्यारभ्य 'ईश्वरता कर्तृत्वं स्वतन्त्रता' इत्याद्यन्ताः सप्त श्लोकाः सन्ति। एभिः श्लोकैः शरीरबहिर्भावेन प्रतीयमानस्य अनाश्रितादिभूम्यन्तस्य सम्पूर्णविश्वस्य परमशिवस्य परमात्मनो जीवात्मनश्च शरीरत्वमनेकाभिर्युक्तिभिरुपपादितम्।

द्वितीयस्कन्धे 'प्रत्यवमर्शात्मासौ चितिः' इत्याद्युपक्रम्य 'शक्तिर्माया प्रकृतिः' इत्याद्यन्तास्त्रयोदश श्लोकाः सन्ति, एभिः श्लोकैः प्रकाशस्य विश्वात्मकताऽनेकविधाभियुक्तिभिस्तथा प्रतिपादिता यथा देहदेहिभावादिभेदभ्रमः समूलमुन्मूलितः स्यात्।

तृतीयस्कन्धे 'अहमेकोऽनस्तमित' इत्यारभ्य 'अस्तमितमर्थजातम्' इत्याद्यन्तैरेकोनविंशतिश्लोकैश्चितो विश्वात्मकताया असम्भावनाविपरीतभावनाभ्यां परिभवानर्हत्वमुपपादितम्।

प्रकाश एवैको भावाभावात्मकजगदाकारेण परिस्फुरति। सः, त्वम्, अहमित्येवं त्रिधा प्रतीयमानाः पुरुषाः परमार्थतः प्रत्यवमर्शात्मानः प्रकाशलक्षणान्महापुरुषान्न व्यतिरिच्यन्ते, इत्थमुक्तरीत्या भिन्नतयाऽवभासमानं शब्दार्थोभयात्मकं कृत्स्नं जगत् प्रकाशमात्रमेव पर्यन्ते पर्यवस्यतीत्यादि तत्त्वं स्कन्धेऽस्मिन् प्रतिपादितम्।

चतुर्थः स्कन्धो विभूतिस्कन्ध आख्यायते। अस्मिन् 'मत्स्थमपि भुवनवृन्दम्' इत्याद्यारभ्य 'इति बोधितः स' इत्याद्यन्तास्त्रयोदश श्लोकाः सन्ति। तत्र प्रथमेन

चतुष्केण अप्रबुद्ध-प्रबुद्धकल्प-प्रबुद्ध-सुप्रबुद्धकल्प-सुप्रबुद्धरूपाणां पञ्चविधप्रमातॄणां प्रतीतिप्रकाराः प्रदर्शिताः। तदनन्तरं श्लोकाष्टकेन सुप्रबुद्धस्य सिद्धयोगिनः प्रमातुरिच्छामात्रेण विविधानां विभूतीनामाविर्भावस्वरूपमुपवर्णितम्।

अन्तिमेन उपसंहारश्लोकेन बोधोदयलब्धशक्तितत्त्वावेशस्यापगताखिलमलस्य पशुभावमुक्तस्येन्द्रस्य शिवत्वलाभं वर्णयता सर्वः साधकश्चरमे स्वात्मानं जगद्गुरुपरमेश्वरस्वरूपतया प्रतिपद्यत इति प्रतिपादितम्।

साम्बपञ्चाशिका

एष ग्रन्थो भगवतो वासुदेवस्य पुत्रेण श्रीसाम्बेन विरचितः। अस्मिन् लोकानुजिघृक्षया स्वात्मलक्षणस्य विवस्वतः स्तुतीरुपन्यस्यता ग्रन्थकारेणानेके तन्त्रसिद्धान्ताः स्पष्टं वर्णिताः। राजानकस्य श्रीक्षेमराजस्य गभीरया टीकया समुद्भासितोऽयं ग्रन्थो बह्वागमसिद्धान्तान् विवृण्वन् विपश्चितां महते मनस्तोषाय कल्पते। त्रिपञ्चाशत्संख्यैर्महाकायैः पद्यैर्ये विशिष्टा आगमविषया एतत्प्रबन्धाङ्गतां नीतास्तेषु कतिपये संक्षेपत इहोपन्यस्यन्ते।

प्रथमे पद्ये ब्रह्मणः प्रथमोन्मेषं शब्दब्रह्मरूपं प्रणवध्वनिमरुणतया, शब्दार्थात्मना तदीयविवर्तरूपं सर्वं जगत् तज्ज्योतीरूपतया, ऋग्यजुःसामस्वरूपां वेदत्रयीं तन्मण्डलरूपतया, सर्वविद्यानामास्पदत्वेन तदीयस्पन्दनतया च, षड्जादीन् सप्त स्वरान् सप्ताश्वरूपतया बोद्धृविग्रहगतं बोधस्थलं वियद्रूपतया च निर्वर्ण्य परब्रह्मणः परार्करूपतया सामान्यव्याप्त्या स्तुतिः कृता।

द्वितीयस्मिन् पद्ये 'ओम्' इति शब्दात्मकप्रणवरूपस्य परब्रह्मप्रथमोन्मेषस्य परावाणीरूपाया अकारादिक्षान्तशब्दसामान्यशरीरायाः पश्यन्तीवाचश्च प्रसारकत्वं प्रतिपाद्य देहे मध्यनाडीगतप्राणब्रह्मनिविष्टः परब्रह्मस्वरूपः परमादित्यो देहमध्यनाडीव्याप्त्या प्रपद्यमानतया स्तुतः।

तृतीयस्मिन् पद्ये स एक एव चिद्भानुस्त्वगादित्रयोदशकरणमूर्तितया, अहंकारस्य ग्राहककुक्षिनिक्षेपे त्वगादिबुद्ध्यन्तद्वादशकारणात्मना द्वादशादित्यतया, आन्तरस्य बाह्यस्य च जगतः प्रकाशनेन वेद्यैकरूपतया मृतकल्पानां देहादीनामण्डानां प्राणप्रदत्वेन मार्तण्डतया च विज्ञाप्य प्रपञ्चव्याप्त्या स्तुतः।

पञ्चमपद्ये परमादित्यस्य चैतन्यभानोर्ब्रह्मनाडीरूपाया मूर्तेर्देहे बहिः सर्वभूतेषु च व्याप्तिं प्राणादिजिष्णुयोगिजनप्राप्यत्वं च वदता प्राणादिकालुष्योपशमलक्षणा प्रसन्नता चिदानन्दघनतया स्फूर्तिमत्ता च समभ्यर्थिता।

षष्ठपद्ये चैतन्यभास्वतः परमादित्यरूपाया मूर्तेः सर्वत्र सर्वदाऽप्रतिहतपथतया, शीतोष्णयोरत्याधिक्यप्रतिषेधेन सदा समस्ततया, गतिमत्त्वेन सदैवाप्रमिततया, परमाह्लाददानेन निस्तापतया, शून्यतात्मना प्रमित्यनर्हत्वेन राहुग्रासरहिततया च

बाह्यार्कस्य मूर्तितो व्यतिरेकं कलिवञ्चकप्रसङ्गे विष्णुतनोरिव राजमानत्वं च निर्वर्ण्य तस्याश्चिदानन्दघनात्मना स्थितिलक्षणा श्वेतता सुप्रसन्नता च प्रार्थिता ।

अष्टमपद्ये चैतन्यभानोरक्षय्यं भूमस्वरूपं सोमकल्पस्य मेयवर्गस्योदयनिलयभूमित्वं वेदानां च ब्रह्मामृतमाक्षिकलग्नमधुकरीसङ्घरूपत्वं च प्रदर्श्य प्रपद्यमानता वर्णिता ।

नवमपद्ये सूर्यस्य वामनस्य च प्रकाशेन पादेन च सर्वलोकक्रान्तिमिव चिदर्कस्य सर्वजगदात्मना उन्मेषलक्षणां विश्वव्याप्तिं विज्ञाप्य विश्वोत्कृष्टतया तस्य वर्तनमाकाङ्क्षितम् ।

दशमे पद्ये क्रमेण शाक्तस्य धाम्नो ध्यानं विधाय परविमर्शात्मानं नादं शाक्तरूपानुप्राणितं स्वात्मतयाऽन्तः साक्षात्कृत्य 'भूः स्वाहा' इत्यादिकाश्चतस्रो व्याहृतीः प्रणवोच्चारणपूर्वकमुच्चार्य शाक्तशाम्भवधाम्नोरवष्टम्भेनात्मनो व्युत्थानदशां तदभेदरसमयीं च सम्पाद्य वेदमातुः प्रतिपाद्यं चिदादित्यस्य सर्वोत्कृष्टं तेजः शरणीकृततया समुपदिष्टम् ।

एकादशे पद्ये चिदद्वयावबोधानुदयं यावत् प्रवर्तमानायाः सर्वविधभेदकल्पनात्मकाविद्याया विनाशार्थं स्तोतृस्तुत्यादिभेदकल्पनात्मिकाया अविद्यायाः साहाय्येन निर्वर्तमानस्य स्तुत्यादेरेव सम्पाद्यतां बाह्यप्राणार्करूपेण प्राणब्रह्मरूपेण विश्वात्मचिदानन्दघनरूपेण च चिदर्कस्यैव स्तोतव्यतां च प्रतिपादयता परमात्मोत्कर्षपरामर्शात्मिकया स्तुत्यैव परमसमावेशः सुलभ इति तत्त्वं निर्वर्णितम् ।

त्रयोदशे पद्ये चिद्भानुत एव सर्वविधाया वाचः प्रसरणेन तस्य तया गोचरीकरणस्य दुर्घटतया विधिमुखेन तन्निरूपणस्य दुःशकतां निषेधरूपेण च कथंचित् शक्यतां वदता 'तुभ्यं नम' इति वचोव्यतिरिक्तायाः स्तुतेर्वस्तुतोऽसम्भवं च ब्रुवता तदीयोऽमितो महिमा प्रकाशितः ।

त्रयोविंशे पद्ये मनोबुद्धीन्द्रियलक्षणान् सप्ताश्वान् पश्यन्तीवागाख्यमेकमात्रमश्वं चारूढस्य चिद्भानोरुपासनया स्वरगुणकलाप्रभृत्युपाधिलक्षणाश्वानारूढस्य निरुपाधिचिदानन्दघनस्य परमादित्यस्य प्रकाशलक्षणा प्राप्तिर्भवतीति तत्त्वमुपवर्णितम् ।

चतुर्विंशे पद्ये एकस्य चिद्भानोरेवान्नरूपतयाऽन्नदरूपतयाऽन्नादरूपतया च वर्णनं विदधता स एव वेद्यवेदनवेदितृभावेन प्रसरतीति न किञ्चित् ततो व्यतिरिक्तम् , स एव सर्वस्य जगत आत्मेति विशदीकृतम् ।

पञ्चविंशे पद्ये प्राणापानयोरग्नीषोमप्रभृतितत्तद्युग्मयोः कार्यकारितया तत्तदुभयात्मकतां प्रदर्श्य उदानधाम्नि तस्य तस्य युग्मजातस्य विलापनेन चिदात्मधाम्नि अवस्थित्या चिदाख्यस्य परमादित्यस्य प्राप्तिर्भवतीति स्पष्टीकृतम् ।

षड्विंशे पद्ये श्लेषमहिम्ना भौतिकेन भानुना चिदात्मकस्य भानोः सादृश्यं वर्णयता तस्य स्वगर्भतो विश्वप्रसवाय अग्नीषोमाधिरूढत्वं क्रमेण प्रवर्तमानैर्विचित्रैरुन्मेषनिमेषैरसामान्यस्य शाक्तानन्दरसस्यास्वादनलम्पटत्वं चाभिहितम्।

सप्तविंशे पद्येऽयमर्थोऽभिहितो यद् यथा बाह्यः सूर्यः स्वरश्मिभिः सोमं द्रुतं कृत्वा तदीयपञ्चदशकलाभिर्देवनराद्यात्मकं जगत् तर्पयन् अमाख्यया षोडश्या कलया ब्रह्माण्डोदरे स्वात्मयागं करोति, तथैव चित्सूर्योऽप्यात्मनः शाक्तेन तेजसा मेयजातरूपं सोमात्मकं हविर्निष्पाद्य तेन ब्रह्माद्यनाश्रितान्तकारणेष्वधिष्ठितं धरादिशिवतत्त्वान्ताध्वमयं जगत् तर्पयन् ऊर्ध्वतुर्यार्धसंज्ञिकाममारूपां कलां कवलयन्नात्मयागं विधत्ते।

त्रिंशे पद्ये चिदादित्यस्य प्रथमोन्मेषादिरूपै रश्मिभिर्जगद् विकास्यते, चरमनिमेषादिभिश्च तैस्तदखिलं चिदेकमयतां नीयत इति न्यरूपि।

द्वात्रिंशे पद्ये चिदादित्यात् प्रकटितः सम्पूर्णः प्रपञ्चस्तदात्मक एव, अहंत्वेनात्मानमनुभवन् सर्वो देही तदिच्छया प्रापितग्रहीतृत्वादिभावतया संकुचितज्ञानशक्तित्वेनाज्ञतां गतः साधनया सर्वोपाधिविगलने पर्यन्ते तदेकात्मतामेवापद्यत इत्युक्तम्।

त्रयस्त्रिंशे पद्येऽज्ञोऽपि जनश्चिदर्कस्य परामर्शात्मना संस्तवेन पश्चिमे जन्मनि पूर्वाखिलजन्मार्जिते पुण्यपापे विधूय शिवत्वलाभे जातस्पृहो भक्तिश्रद्धायुतो लब्धदीक्षः साधनारतो मुक्तिलाभे सफलो भवतीत्यभिव्यञ्जितम्।

षट्त्रिंशे पद्ये साधकस्य चेतसि चिदर्कोदयेन रागादिलक्षणस्य तमसो निवृत्त्याऽन्तर्मुखतां प्राप्ताऽपि तदीया मतिश्चिदैक्याज्ञानलक्षणां निद्रां तावन्न त्यजति यावच्चित्सूर्यः स्वगाढज्योतिषा तां नाश्लिष्यतीति साधनधियः पूर्णं जागरणं तत्कृपैकायत्तमित्यसूचि।

सप्तत्रिंशे पद्येऽयमर्थः प्रत्यपादि यद् यथा बाह्यः सूर्यः स्वोदयेन जगत्तिमिरं तिरस्कृत्यापि निशादिनविभागेन तमो जीवयन् सर्वथा तन्न निःशेषयति, तथैव चित्सूर्यः साधकस्य चित्ते समुदितस्तदीयं तमो निरस्यापि व्युत्थानदशायां पुनस्तं क्लेशतमसा कलुषयति, अतो निर्व्युत्थानसमावेशरसास्वादोदयपर्यन्तं चिदर्कं स्तुवतैव वर्तितव्यं साधकेन।

अष्टत्रिंशादिपञ्चाशत्तमान्तपद्यैर्विविधप्रकारैश्चिदर्कं दयोदकवर्षणाय साधकेन प्रार्थनीयतया प्रतिपाद्य चरमेण श्लोकत्रयेण सर्वं निरुक्तं निष्कृषता भक्तिभाजे जनाय भोगमोक्षप्रदानार्थं भगवांश्चैतन्यभानुरभ्यर्थितः।

त्रिपुरामहिमस्तोत्रम्

एष स्तोत्रात्मक आगमग्रन्थोऽनसूयातनूभवेन क्रोधमूर्तिना शिवात्मना महामुनिदुर्वाससा रचितः। 'श्रीमातस्त्रिपुरे' इत्यादि 'सदसदनुग्रह' इत्याद्यन्तपट्-

पञ्चाशत्पद्येषु परिसमाप्तेऽस्मिन् ग्रन्थे त्रिपुरसुन्दर्याः स्तोत्रमिषेणानेकानि तन्त्रविद्यारहस्यानि संकेतितानि सन्ति ।

प्रथमेन पद्येन वाग्भव-कामराज-कामकलाभिधकूटत्रयदेवतानां भावनामुक्त्वा द्वितीयेन च ब्रह्मरन्ध्रस्थितसहस्रदलकमलकर्णिकान्तर्गतत्रिकोणात्मकसिंहासनस्थितां चिद्रूपां त्रिपुरसुन्दरीं स्तुत्वा तृतीयादिद्वादशान्तश्लोकैः संकेतसारविद्यायाः बालाविद्यायाश्च वाग्भवादिबीजत्रयं वर्णयता त्रयोदशचतुर्दशपद्याभ्यां तज्ज्ञानलभ्यं सामर्थ्यं प्रतिपादितम् ।

पञ्चदशेन पद्येन सदाशिवोक्तनित्योपासनाया अवश्यकर्तव्यता, षोडशेन सुकवित्वलाभायाधीतानेकशास्त्रस्यापि त्रिपुरसुन्दर्या अनिवार्योपास्यता, सप्तदशेन देव्युपासकस्यानिष्टप्रदानामपीष्टप्रदत्वेन परिणामिता, अष्टादशेन त्रिपुरेति नाम्नः कलनमात्रेण मानवस्य धन्यता चेत्यभिधाय एकोनविंशेन मूलाधारहृदयभ्रूमध्यवर्तिनः कूटत्रयस्य प्रणवरूपता प्रत्यपादि ।

विंशैकविंशपद्याभ्यां त्रिपुरसुन्दर्या गायत्र्यादीनामधिदेवतात्वं कोशपञ्चकद्वारा भगवत्या विश्वशरीरे विलीनत्वं तज्ज्ञातुर्ब्रह्मज्ञत्वं च ब्रुवता द्वाविंशेन पद्येनागमरहस्यज्ञानाय सद्गुरुतो दीक्षाग्रहणस्यावश्यकतोपदिष्टा ।

शैववैष्णवसौरप्रभृत्यनेकेषु स्वल्पायाससुलभेषु मुक्तिमार्गेषु सत्स्वपि न्यासपूजादिविस्तारेण दुर्गमोऽपि त्रिपुराराधनमार्गोऽज्ञानतमसोऽपुनर्भवनिवृत्तये नूनमनुसरणीय इति त्रयोविंशेन पद्येनाभिधाय त्रिपुरसुन्दर्या आराधनं विना केवलमुपनिषद्रीत्याऽऽत्मनः श्रवणादिसाधनमात्रेण जननमरणप्रदेभ्यस्तद्विलासभूतविविधभोग्यदिव्यायुधेभ्यो मनुष्यस्य त्राणं न भवितुमर्हतीति चतुर्विंशेन वदता संसारसमुद्रे मग्नानां प्राणिनामुद्धाराय भगवती पराम्बैव पञ्चविंशेन प्रार्थिता ।

षड्विंशेन पद्येन व्रतयागादिभिः साधकस्य शारीरः क्लेश एव वर्धते मुक्तिपदं तु दूरतरमेव तिष्ठति, तत्तु मातुराराधनेनैव साध्यमित्यभिधाय सप्तविंशेन सकलमातृकामूलभूताया अकारहकाररूपायाः परस्याः शक्तेः, अष्टाविंशेन च सदैवतस्य श्रीचक्रस्य स्तुतिः कृता ।

एकोनत्रिंशादिपद्यैरान्तं नानाप्रकारैर्भगवत्याः स्तवव्याजेन बहूनि तान्त्रिकतत्त्वानि शंसता महात्रिपुरसुन्दर्या उपासनाया ऐहिकामुष्मिकसमृद्धिलाभेन सह मोक्षलाभस्य सुघटत्वमुक्तम् ।

स्पन्दप्रदीपिका

ग्रन्थोऽयमागमशास्त्रगुरुणा तत्रभवता उत्पलाचार्येण प्रणीतः । अस्मिन् भट्टकल्लटेन गुरोर्वसुगुप्तात् प्राप्तस्य आगमरहस्यस्य शिष्याणामवबोधायानुष्टुप्पञ्चाशिकया संगृहीतस्य विशदं व्याख्यानं कृतमस्ति । स्पन्दपदव्यपदेश्य आत्मा मायातमःस्तोमे-

नाच्छन्नतया न प्रकाशतेऽतस्तत्प्रकाशनाय कृतोऽयं ग्रन्थः 'स्पन्दप्रदीपिका' इत्यन्वर्थनाम्ना स्थाने चकास्ति ।

ग्रन्थेऽस्मिन् तन्त्रशास्त्रस्य शास्त्रान्तराणां च बहून् ग्रन्थानुद्धृत्य स्पन्दकारिकाणां प्रतिपाद्यमर्थजातं तैः संवादयता सुस्पष्टयता च स्पन्दतत्त्वं निपुणतया निरूपितम् । अस्य ग्रन्थस्य सम्पर्कमागतोऽध्येता नूनमागममहोदधेरन्तःप्रवेशमासाद्य तन्त्रशास्त्राणां मर्मज्ञतां लभमानः कृतार्थो भवितुमर्हतीति निर्विवादम् ।

ग्रन्थस्यास्य भाषादृशा सुगमतया तद्विषयविस्फोरणं संक्षिप्तादपि प्रयासाद् विरमता मयाऽध्येतारस्तदध्ययने स्वतः प्रवृत्ता दिदृक्ष्यन्ते ।

अनुभवसूत्रम्

अनुभवसूत्रनामाऽयं ग्रन्थो महात्मना मायिदेवेन शिवोक्तस्य 'वातुल'-महातन्त्रस्योत्तरभागाङ्गभावेन रचितोऽधिकरणाष्टकोपेतः शिवसिद्धान्ततन्त्राख्यया-ऽवद्योतते ।

अस्य प्रथममधिकरणं 'पारम्पर्यक्रम'नाम्ना, द्वितीयं 'स्थलनिर्देश'नाम्ना, तृतीयं 'लिङ्गस्थलनिरूपण'नाम्ना, चतुर्थं 'मङ्गस्थलनिरूपण'नाम्ना, पञ्चमं 'लिङ्गाङ्ग-संयोगविधि'नाम्ना, षष्ठं 'सर्वाङ्गलिङ्गसाहित्य'नाम्ना, सप्तमं 'श्रीलिङ्गार्पणसद्भाव'-नाम्ना, अष्टमं च 'क्रियाविश्रान्ति'नाम्ना व्यवह्रियते ।

प्रथमेऽधिकरणे ऐपुर्यां सोमनाथप्रसादेन साक्षाद् विष्णोः प्रादुर्भूतादादिगुरो-रुपमन्योरारभ्य प्रकृतग्रन्थकर्तृमायिदेवपर्यन्तमाचार्यपरम्परायाः क्रमो वर्णितः ।

द्वितीयेऽधिकरणे सच्चिदानन्दलक्षणस्य परब्रह्मात्मनः शिवतत्त्वस्य विश्वस्थिति-लयाधारतया स्थलत्वं समर्थ्य शिवस्य लिङ्गस्थलत्वं जीवस्य च अङ्गस्थलत्वं निर्दि-शता लिङ्गाङ्गयोरैक्यज्ञानादज्ञानग्रन्थिभङ्गे जीवस्य शिवतत्त्वलाभो भवतीत्युक्तम् ।

तृतीयेऽधिकरणे चराचरात्मकस्य सर्वस्य जगतो लयगत्योराश्रयतया शिवस्य लिङ्गत्वं निरूप्य भाव-प्राण-इष्टनाम्ना त्रैविध्येन स्थितस्य लिङ्गस्य बिन्दुनाद-कलाभेदेन षोढात्वं चित्-परा-आदि-इच्छा-ज्ञान-क्रियानामभिः शक्तिषाड्विध्यं च वर्णयता शक्तियुक्तानां स्थलानां स्वरूपलक्षणवर्णनपूर्वकं विशदाद् विस्तृताच्च लिङ्ग-ज्ञानाज्ज्ञातुः शिवत्वसौलभ्यमभिहितम् ।

चतुर्थेऽधिकरणे अं=परं ब्रह्म प्रति गमनाद् जीवोऽङ्गमुच्यत इत्युक्त्वा योग-भोग-त्यागनाम्ना तस्य त्रैविध्यं पृथगर्थतया प्रत्येकं द्वैविध्यसिद्ध्या षाड्विध्यं च वर्णयता समरसा, आनन्दाकारा, अनुभवाकारा, परमा, अवधानात्मिका, नैष्ठिकी चेति षड्विधां भक्तिं निरूप्यान्ते अङ्गस्थलज्ञानस्य शिवाद्वैतलाभानुगुणत्व-मुक्तम् ।

पञ्चमेऽधिकरणे शिवात्मकस्य लिङ्गस्य जीवात्मकस्य चाङ्गस्य सम्यग् योगलक्षणः संयोगस्तद्विधिश्च वर्णितः। अमी लिङ्गाङ्गसंयोगा अस्मिन्नधिकरणे बहुधा निरूपिताः, यथा 'तत्त्वमसि' इति वाक्ये तत्पदार्थो लिङ्गम्, त्वंपदार्थोऽङ्गम्, असिपदार्थः संयोगः, सच्चिदानन्दे सन्मात्रं लिङ्गम्, चिन्मात्रमङ्गम्, आनन्दमात्रं तयोः संयोगः, नादो लिङ्गं बिन्दुरङ्गम्, कला संयोगः, मन्त्रो लिङ्गम्, क्रिया अङ्गम्, तयोः प्रयोगः संयोगः, पुरुषो लिङ्गम्, प्रकृतिरङ्गम्, तयोः प्रेरकत्वेन स्थित ईश्वरः संयोगः, अकारो लिङ्गम्, उकारोऽङ्गम्, मकारः संयोग इत्येवमादिः। यया लिङ्गसम्बन्धो दीयते मलत्रयं च क्षीयते सा दीक्षा, सा च वेधात्मिका, मन्त्रात्मिका, क्रियात्मिका चेति त्रिधा, ताभिरुपपन्नः परमया भक्त्या सम्पन्नश्च साधको मलत्रयं दग्ध्वा समीचा लिङ्गाङ्गसंयोगेन कृतार्थतामात्मनो निर्वर्तयतीति निरूपितम्।

षष्ठेऽधिकरणे एकमेव लिङ्गं शक्तिभेदेन नानात्वमुपगतं भक्तिभेदभिन्नेषु बहुषु जीवाङ्गेषु गुरूपदेशेन प्रतिष्ठामवाप्य निरन्तरं प्रकाशमानं सर्वाङ्गलिङ्गसाहित्यरूपत्वेन वर्णयित्वा मध्ये तदेव विविधैः प्रकारैः परिस्फुटयता अन्ते पञ्चाक्षरषडक्षरयोः शिवमन्त्रयोस्तन्त्रसम्मतोऽर्थः प्रणिगदितः।

सप्तमेऽधिकरणे सर्वाः क्रियाः कुर्वतोऽपि निर्लेपत्वाधायकः श्रीलिङ्गार्पणसद्भावो वर्णितः। तच्चार्पणं क्रियार्पणज्ञानार्पणभेदेन द्विधा निरूप्यान्येऽप्यनेके विषया विशदमावेदिताः।

अष्टमेऽधिकरणे क्रिया लिङ्गे समर्पणं प्राप्य विश्रान्तिं लभन्ते, बन्धनौपयिकं फलं न प्रसुवत इत्येवंविधां क्रियाविश्रान्तिं निरूपयता निष्कामभावेन शिवार्पणधिया क्रियमाणाः कर्मज्ञानभक्तयः पुंवन्ध्ययोः सङ्गम इव फलाय न कल्पन्त इत्यादिरर्थः प्रत्यपादि।

वातुलशुद्धाख्यं तन्त्रम्

अस्मिन् ग्रन्थे स्कन्दं मोक्षदं शिवज्ञानमुपदिशता श्रीकण्ठेन दध्नो घृतमिव सहस्रागमग्रन्थतस्तत्त्वसारः समुद्धृत्य सञ्चितः। पटलदशकात्मना विततोऽयं तन्त्रग्रन्थः प्रथमेन पटलेन तत्त्वभेदम्, द्वितीयपटलेन तृतीयपटलेन च चक्रभेदम्, चतुर्थपटलेन वर्णभेदम्, पञ्चमपटलेन मन्त्रभेदम्, षष्ठपटलेन प्रणवभेदम्, सप्तमपटलेन ब्रह्मभेदम्, अष्टमेन अङ्गभेदम्, नवमेन मन्त्रजातम्, दशमपटलेन च मन्त्रकीलं वर्णयन् तान्त्रिकाय ज्ञानाय तान्त्रिक्यै सिद्ध्यै च सोत्कण्ठानां निरुपमः सहायकः।

तदेवमेनं संग्रहग्रन्थं सुसम्पाद्य प्रकाशार्हतां नयतो योगतन्त्रविभागस्याध्यापकाननुसन्धातॄन् सहयोगिनश्च धन्यवादैः सभाजयन् विरमति विस्तराद्।

चैत्रशुद्धप्रतिपत्, सं० २०२७
वाराणसेयसंस्कृतविश्वविद्यालयः
वाराणसी।

बदरीनाथशुक्लः
अनुसन्धानसंचालकः
७–४–७०

विषयानुक्रमणी

विरूपाक्षपञ्चाशिकायाः

शरीरबाह्यतया प्रतीयमानस्य विश्वस्य स्वशरीरत्वम् १
अस्मिताहन्तयोः स्वरूपनिरूपणम् २
देहदेहिभावादिभ्रमबाधनाय प्रकाशस्य वैश्वात्म्यम् ५
प्रकाशग्राहकयोरभेदः ६
जगतः पञ्चधात्वेऽपि चिदात्मकत्वम् ७
चितिरेषा नानाप्रकारेणोपास्यते ८
प्रकाशस्य षडध्वरूपत्वम् ८
प्रकाशस्य विश्वोत्पादकत्वम् ९
चतुर्विभागस्याण्डस्य प्रतिपादनम् ९
वैश्वात्म्यस्यासम्भावनाविपरीतभावनादोषपरिहारः १०
ग्राहकसामान्यापेक्षया ग्राह्यापेक्षया च चितेरभेदः १०
भानतिरोधानादिकृत्यसंपादिकाः पञ्च शक्तयः ११
शक्तिस्वरूपपरामर्शः १२
कार्त्स्न्येन विमर्शाविष्टे जगति सर्वभेदभ्रमोपशमः १३
ज्ञातुः क्रमिकत्वस्य नित्यसोपाधिकत्वात् प्रकाशतादात्म्यम् १५
प्रबुद्धादिप्रमातृपञ्चकनिरूपणम् १८
सुप्रबुद्धस्येच्छामात्रेणाभिमतानां विभूतीनामाविर्भावः १९
सर्वसिद्धिमूर्धन्यसिद्धिद्वयप्रतिपादनम् २०
शास्त्रोपसंहारः २२

साम्बपञ्चाशिकायाः

सामान्यव्याप्त्या परमार्कस्तवनम् २३
देहस्थमध्यनाडीव्याप्त्या स्तुतिः २४
महाव्याप्त्या सूक्ष्मव्याप्त्या प्रपञ्चव्याप्त्या च चिदर्कनमनम् २५
वाणीस्तवनम् २५
परमादित्यमूर्तिर्ब्रह्मनाडीसंनिविष्टा २६
युगपदन्तर्बहिश्चार्कमूर्तिस्तवनम् २७

अग्नीषोमावखिलजगतः कारणम्	३३
शब्दब्रह्मभावनम्	३४
स्थूलसूक्ष्मपररूपस्य चिदर्कस्य त्रयीमयत्वम्	३५
चिदर्कस्याण्डचतुष्टयव्यापकत्वम्	३८
चिदर्कस्य कालकलनाकर्तृत्वम्	३८
अहोरात्रप्रशमे रूढा लोकोत्तराः	४०
चिदर्कादेव जगदुदयापायौ	४०
चिदर्कस्य जगन्मित्रताप्रतिपादनम्	४२
समावेशदशाप्रार्थनम्	४४
चिदर्कस्य सर्वश्रुतिमयत्वम्	४५
दिनकरस्यारोग्यभोगमोक्षप्रदत्वम्	४६
उन्मनाख्यस्य मध्यमपथस्य जीवन्मुक्तिप्रदत्वम्	४७
स्तोत्रस्यास्य साम्बकृतित्वनिवेदनम्	४८
फलश्रुतिः	४९

त्रिपुरामहिमस्तोत्रस्य

कूटत्रयभावनारूपं मङ्गलाचरणम्	५१
सहस्रदलकमलकर्णिकान्तर्महामध्यत्रिकोणसिंहासनस्था चिद्रूपिणी त्रिपुरा	५२
सकलशब्दजालप्रकाशार्कसंकेतसारविद्यादिभूतद्वादशाक्षररूपवाग्भवबीजाभिनन्दनम्	५३
चतुर्विधपाण्डित्यमहाकाव्यरचनसामर्थ्यप्रदबालाविद्यावाग्भवस्तुतिः	५४
वाग्भवकूटोपरितनमात्रारूपकुण्डलिनीस्तवः	५५
कामराजबीजनिरूपणम्	५५
कामकलारूपमध्यमबीजस्याखिलकामपूरकत्वेन विशिष्टज्ञानप्रकाशकत्वं प्रणवत्वं च	५७
तृतीयबीजोद्धारस्तस्य कामकलासाम्यता ब्रह्मात्मकता चिद्रूपता च	५७
बालातृतीयबीजस्य पराशक्तिरूपत्वम्	५८
पराबीजस्य श्रीपदत्वं वाक्सिद्धिप्रदत्वं मोक्षप्रदत्वं च	५९
विद्याद्वयस्यान्यतरसंयुक्तबीजाराधनेन यथेष्टफलप्रदत्वम्	६०
साङ्गोपाङ्गनित्योपास्तिविधानम्	६१
कूटत्रयस्य प्रणवत्वप्रतिपादनम्	६३
श्रीमहात्रिपुरसुन्दर्या गायत्र्यादिसर्वदर्शनाधिदेवतात्वम्	६४
कोशपञ्चकद्वारा भगवत्या विश्वशरीरे विलीनत्वं ज्ञातुर्ब्रह्मज्ञत्वं च	६५
सद्गुरोः सकाशाद्दीक्षाग्रहणस्यावश्यकत्वम्	६५
शैववैष्णवसौरादिमार्गापेक्षया मार्गस्यास्य वैशिष्ट्यम्	६६

श्रीमहात्रिपुरसुन्दरीप्रार्थनम् ६७
सकलमातृकाप्रपञ्चमूलभूता अकारहकाररूपा परा शक्तिः ६८
श्रीचक्रस्तवनम् ६९
श्रीचक्रावरणपूजानन्तरं परापूजाविधानम् ७०
सर्वाभरणभूषिताया बिन्दुचक्रसिंहासनोपविष्टायाः श्रीत्रिपुरसुन्दर्याः स्तुतिः ७१
श्रीमहात्रिपुरसुन्दर्याः सर्वाङ्गस्तवनम् ७१
महिमस्तोत्रपाठस्यैहिकं फलम् ८१
स्तोत्रस्यास्य दुर्वासःकृतित्वम् ८१

स्पन्दप्रदीपिकायाः

स्पन्दशास्त्रस्य संबन्धाभिधेयविषयप्रयोजनादिप्रतिपादनम् ८३
समग्रग्रन्थार्थक्रोडीकारात्मकं स्तवनम् ८७
निरोधसत्ताप्रतिषेधनम् ९२
संवेत्तारं विना संवेदनस्याभावः ९४
स्पन्दतत्त्वस्य परमार्थत्वम् ९६
क्षोभशान्त्या परमपदावगमः ९८
शून्यवादनिरासः १०१
अप्रबुद्धधियां दुरुत्तारे घोरे संसारवर्त्मनि पतनम् १०५
अज्ञस्याप्युत्तरणोपायप्रतिपादनम् १०६
स्पन्दोदयप्रतिपादनम् १०७
मन्त्राणामधिकारानुग्रहादिप्रवर्तकत्वम् १०९
जीवन्मुक्तिप्रतिपादनम् ११५
जाग्रदवस्थायामिव स्वप्नेऽपि निजभावाप्त्या स्वातन्त्र्यम् ११७
स्वरूपस्थस्यैव जाग्रत्स्वप्नादौ स्वातन्त्र्यम् ११८
आत्मनो नानाविधानां विभूतीनां प्रतिपादनम् ११८
अज्ञानस्य गुणाच्छादकत्वम् १२१
उन्मेषस्वरूपनिरूपणम् १२१
उन्मेषानुशीलनपरस्य बिन्दुनादादयः प्रवर्तन्ते १२२
प्रबुद्धावस्थाप्रतिपादनम् १२३
अप्रबुद्धः पशुः पीड्यते १२४
क्रियाशक्तेर्बन्धमोक्षहेतुत्वम् १२५
गुरुभारतीस्तवनम् १२७

आम्नायक्रमवर्णनम् १२७

अनुभवसूत्रम्

प्रथमाधिकरणे

मङ्गलाचरणम् १२९
ग्रन्थकारवंशवर्णनम् १२९
ग्रन्थस्यास्य शिवागमोपजीव्यत्वम् १३१
ग्रन्थस्यास्याष्टाधिकरणात्मकस्य विषयानुक्रमः १३२

द्वितीयाधिकरणे

स्थलशब्दस्य सोपपत्तिकोऽर्थविचारः १३३
स्थलद्वयस्य प्रकारस्वरूपौ १३३
शक्तेः प्रकारद्वयवर्णनम् १३४
कलाभक्त्योः स्वरूपम् १३५

तृतीयाधिकरणे

लिङ्गशब्दस्य व्युत्पत्तिरर्थविचारश्च १३६
लिङ्गत्रयस्य स्वरूपनिरूपणम् १३६
लिङ्गत्रयविभागद्वयानुसारेण षट्स्थलविवरणम् १३७
चिच्छक्त्यादितः शान्त्यतीतादिकलापञ्चकस्योत्पत्तिवर्णनम् १३८
शक्तिषट्कस्य नामानि १३८
महालिङ्गादिस्थलषट्कस्य लक्षणनिरूपणम् १३९

चतुर्थाधिकरणे

अङ्गशब्दस्य व्युत्पत्तिः १४१
अङ्गस्थलस्य योगाङ्गादिप्रकारत्रयनिरूपणम् १४१
योगाङ्गादिप्रकारत्रयस्य नामार्थनिरूपणम् १४१
अङ्गत्रयस्य सूक्ष्मकारणस्थूलशरीररूपत्वं सुषुप्तिस्वप्नजागराख्यावस्थात्रयस्वरूपत्वं च १४१
योगाङ्गभोगाङ्गत्यागाङ्गानां प्राज्ञतैजसविश्वरूपाणां स्वरूपनिरूपणम् १४१
अङ्गत्रयविभागद्वयानुसारेण संजातानि षडङ्गस्थलानि १४२
षडङ्गस्थलस्य कारणादिशरीरत्रयरूपत्वम् १४२
जीवात्मनः प्रकारत्रयरूपत्वम्, प्रत्येकमैक्यशरणादिस्थलभेदानां स्वरूपनिरूपणं च १४२
भक्तिवैचित्र्येण संजातान्यङ्गस्थलस्य षट्प्रकाराणि १४२
भक्तेः प्रकारषट्कनिरूपणं नामोद्देशश्च १४२
तत्तद्भक्तिविशिष्टैक्यादिषट्स्थलानां लक्षणानि तेषां निरूपणं च १४३

ऐक्यादिभक्तपर्यन्तानां षट्स्थलानामात्माकाशादिषडङ्गविषयत्ववर्णनम् १४४
ऐक्य-शरण-प्राणलिङ्गीनां ज्ञानात्मकत्वं प्रसादि-महेश-भक्तानां च क्रियात्मकत्वम् १४५

पञ्चमाधिकरणे

लिङ्गाङ्गसंयोगपदार्थः १४६
शक्तिसम्पर्काल्लिङ्गस्थलस्यैव भक्तिवैचित्र्यादङ्गस्थलस्य नानात्वम् १४६
स्वतन्त्रस्य शिवस्योपास्यत्वमस्वतन्त्रस्य जीवस्य चोपासकत्वम् १४६
गुरुशिष्ययोः शिवात्मनोश्चैक्यम् १४७
अज्ञाननाशकस्य मुक्तिदायकस्य चोपदेशस्य ग्रहणार्थं शिष्यस्य गुरुसमीपे गमनम् १४७
आत्मस्वरूपजिज्ञासाविषयकः शिष्यप्रश्नः १४८
गुरुकृतो लिङ्गाङ्गसामरस्योपदेशः १४८
दीक्षाया लक्षणम्, तस्या भेदा लक्षणानि च १४९
वेधादिदीक्षात्रयेण लिङ्गत्रयसंयोगनिरूपणम् १४९
लिङ्गत्रयोपासनाप्रकारः १५०
पारम्परिकोपासनापरमपद(मुक्ति)दायिनी १५०
जीव-शिव-भक्तीनां क्षेत्र-बीज-बीजित्वनिरूपणम् १५१
साधकस्य भक्तादिषट्स्थलावाप्तिक्रमोपदेशः १५१
लिङ्गस्थलाङ्गस्थलयोर्नामानि १५२

षष्ठाधिकरणे

ज्ञानेन्द्रियादिषु महालिङ्गादिषट्स्थलानामस्तित्वम् १५४
आकाशश्रोत्रयोरिव ज्ञानेन्द्रियकर्मेन्द्रियादिष्वभेदः १५४
ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि तेषां विषया अधिदेवताश्च १५४
सर्वेषामिन्द्रियाणां लिङ्गमुख्यत्वम् १५५
भक्तादिषडङ्गस्थलेभ्यश्चित्तादीनामुत्पत्तिलक्षणनिरूपणम् १५६
भक्तादिस्थलानामुपास्यलिङ्गत्वविवरणम् १५६
पञ्चाक्षरीविद्यासाहित्यनिरूपणम् १५७
शिवपञ्चाक्षरीमन्त्रस्य लिङ्गाङ्गैक्यार्थपरत्वं शिवजीवैक्यार्थपरत्वं च १५७
पञ्चाक्षरीमन्त्रस्य आधारादिषट्चक्रेषु स्थितिवर्णनम् १५८
पञ्चाक्षरीमन्त्रस्य आचारादिषड्लिङ्गस्वरूपवर्णनम् १५८
पञ्चाक्षरीमन्त्रस्य शरीरान्तः रक्तादिधातुवर्तित्वम् १५८

सप्तमाधिकरणे

शिवलिङ्गार्पणस्य द्वैविध्यम् १५९
क्रियार्पणस्य वर्णनम् १५९
द्रव्यत्रयस्य समर्पणयोग्यत्वम् १५९

त्रिभेदप्रसादनिरूपणम् १६०
ज्ञानार्पणस्य निरूपणम् १६१
अङ्गाद्यष्टस्थलेषु षट्स्थलस्यास्तित्वप्रतिपादनम् १६१
गायत्रीमन्त्रस्य लिङ्गैक्यपरताप्रतिपादनम् १६४
पदार्थ-प्रसाद-समर्पणानां शिवजीवैक्यपरताप्रतिपादनम् १६४
एवं परिज्ञाय कर्म कुर्वाणस्य कर्मबन्धनं नास्तीति दृष्टान्तपुरःसरं प्रतिपादनम् १६५

अष्टमाधिकरणे

क्रियाविश्रान्तिरेव सम्यग्ज्ञानमित्यस्य निरूपणम् १६६
बन्धमोक्षयोरभावे भक्तिरिति प्रतिपाद्य तस्यास्त्रिगुणातीतत्वनिरूपणम् १६६
भक्तियोगरहस्यनिरूपणम् १६७
कर्म-ज्ञान-भक्तीनां लक्षणानि १६७
अद्वैतभक्तितः शिवप्रसादप्राप्तिः १६९
शिवप्रसादप्राप्तभक्तस्य जगतः स्वात्मत्वेनानुभव इत्यस्य वर्णनम् १६९
अद्वैतभक्तियुक्तशिवयोगिनः कर्मफलभोक्तृत्वं नास्तीति सोदाहरणं निरूपणम् १७२
पराभक्तेः स्वरूपम् १७२
शिवैक्यप्राप्तभक्तानां स्वरूपनिरूपणम् १७३
ग्रन्थोपसंहारः १७४

वातुलशुद्धाख्यतन्त्रस्य

प्रथमः पटलः

कैलासपर्वतस्य वर्णनम् १७५
स्कन्दस्य प्रार्थना १७५
शुद्धाख्यतन्त्रस्य महत्त्ववर्णनम् १७५
पटलभेदनिरूपणम् १७६
तत्त्वस्वरूपनिरूपणम् १७६
तत्त्वभेदाः १७६
महेशस्य लक्षणम् १७७
शिवस्य लक्षणम् १७७
शिवादितत्त्वानां स्थूलसूक्ष्मप्रभेदाः १७८
शिवादितत्त्वानां विशेषस्वरूपनिरूपणम् १७८
तत्त्वमूर्तिप्रभावाणां स्वरूपकथनम् १७८
भावस्वरूपलक्षणम् १७८

निष्कलसकलयोः स्वरूपकथनम् १७८
पञ्चसादाख्यतत्त्वानामुत्पत्तिः १७८
शिवसादाख्योत्पत्तिः १७८
अमूर्तसादाख्यस्य उत्पत्तिः १७९
मूर्तसादाख्यस्योत्पत्तिः १८०
लिङ्गमूर्तिस्वरूपवर्णनम् १८०
कर्तृसादाख्यस्योत्पत्तिः १८०
ईश्वरस्य स्वरूपवर्णनम् १८१
कर्मसादाख्योत्पत्तिः १८१
लिङ्गाकारस्य वर्णनम् १८१
लिङ्गपीठयोः शिवशक्त्योश्च पर्यायत्वम् १८१
लिङ्गस्य शिवमयत्वकथनम् १८१
लिङ्गे जगत्सृष्टिः १८१
कर्मोदय एव सृष्टेः कारणम् १८२
पञ्चसादाख्यानां परस्परसमाश्रयणनिरूपणम् १८२
पञ्चसादाख्यानां सर्वाधारत्वम् १८२
कर्मसादाख्यात् पिण्डोत्पत्तिः १८२
पिण्डस्वरूपकथनम् १८२
पिण्डस्यापि शिवमयत्वम् १८२
शैवसिद्धान्ततन्त्राणामुत्पत्तिः १८२
कर्मेशस्य ध्यानम् १८३
देहवर्जितस्य निष्कलस्य वर्णनम् १८३
देहयुक्तस्य सकलस्य वर्णनम् १८३
अङ्गभावभेदकथनम् १८३
अङ्गप्रत्यङ्गसाङ्गानां स्वरूपवर्णनम् १८४
गुणानां दशधा भेदाः १८४
तेषां प्रत्येकं विवेचनम् १८४
ईशस्य स्वरूपवर्णनम् १८५
शिवस्य स्वरूपवर्णनम् १८५
पञ्चमुखानां विशेषस्वरूपकथनम् १८५
सदाशिवस्य विशेषध्यानादिकम् १८५
महेश्वरस्य स्वरूपवर्णनम् १८५
महेशस्य विंशतिरूपाणां विवरणम् १८६
ब्रह्मविष्णुगणेशानामुत्पत्तिः १८६

षण्मुखस्योत्पत्तिः १८७
देवानामुत्पत्तिः १८७
ऋषीणामुत्पत्तिः १८८
उमादीनां शक्तीनामुद्भवः १८८

द्वितीयः पटलः

वर्णभेदविधिः १९०
अकारादिक्षकारान्तवर्णानां कामितार्थप्रतिपादकत्वम् १९०
वर्णानां देवतास्वरूपकथनम् १९०
वर्णपर्यायवाचकनामानि १९०
वर्णानां समुद्भवः १९०
वर्गाणां सृष्टिक्रमः १९०
बिन्दुरूपात् परा शक्तिरित्यादिक्रमेण वाग्भवस्य क्रियाशक्तित्वम् १९१
सप्तस्वरवर्णानां प्रकृतित्वम् १९१
नवस्वरवर्णानां प्रकृतित्वम् १९१
ह्रस्वस्वरवर्णानां विकृतित्वम् १९१
दीर्घवर्णानां विकृतित्वम् १९१
षोडशस्वराणां निरूपणम् १९१
विकलानां वर्णनम् १९१
अकारादिभ्यः ककारादीनामुत्पत्तिः १९१
कलानां विकलानाञ्च स्वरूपभेदः १९२
पुलिङ्गाः स्त्रीलिङ्गाश्च वर्णाः १९२
व्योमादिवर्णानां विवरणम् १९२
प्रकृत्यादीनां बीजादीनाञ्च सम्बन्धः १९२
प्रकृत्यादीनां मात्रानुसारेण विवरणम् १९३
अकारादीनां सर्वदैवत्यवर्णनम् १९३
ज्ञानादिसिद्धीनां विवरणम् १९४
ककारादिक्षकारान्तानां वर्णानां विवरणम् १९४
वर्णानां विशेषसिद्धीनां च फलरूपेण विवरणम् १९४
कलाविकलानां देहदेहिरूपेण कथनम् १९५
स्थूलसूक्ष्मयोर्विवरणम् १९५
जीवार्णस्य लक्षणम् १९५
कलायोजनम् १९६
प्रत्येकवर्णस्य पञ्चदेवात्मत्ववर्णनम् १९६

तृतीयः पटलः

गङ्गातीरादिषु शुद्धदेशेषु चक्रोद्धारनिर्देशनम् १९७
चक्रनिर्माणविवरणम् १९८
देवतान्यासविधिः १९९
वर्णन्यासविधिः २००
चक्रधारणफलम् २००

चतुर्थः पटलः

सृष्ट्यादिवर्गत्रयस्य निरूपणम् २०१
प्रथमावरणे सकाराद्यष्टवर्णानां लेखनम् २०१
द्वितीयावरणे अकारादिवर्णानां लेखनम् २०१
तृतीये तु ककारादिचतुर्विंशतिवर्णानां लेखनम् २०१
सृष्टिमार्गस्वरूपवर्णनम् २०१
ऐन्द्राद्यष्टसृष्टिवर्गाणां स्वरूपवर्णनम् २०२
सृष्टिमार्गोद्धारस्वरूपम् २०२
संहारस्वरूपवर्णनम् २०२
पृथिव्यादिवर्गाणां निरूपणम् २०३
नादादिवर्णनामानि २०३
नादगुह्यपरजीवदेहभूतादीनां स्वरूपकथनम् २०३
बिन्द्वादिपर्यायनामानि २०४
सकारादिबीजनिरूपणम् २०४
अकारस्यादिप्रकृतीत्यादिपर्यायनामोल्लेखनम् २०५
वर्णवर्गाणां सम्बन्धः २०५

पञ्चमः पटलः

मन्त्रस्य देवतास्वरूपत्वं तत्फलञ्च २०६
मन्त्रस्य क्रियास्वरूपत्वम् २०६
मन्त्रेणैव यजनादिसकलकार्यसिद्धिः २०६
मन्त्रशब्दस्य व्युत्पत्तिः २०६
मण्डपविधिः २०७
प्रासादशब्दस्य व्युत्पत्तिः २०७
प्रासादः पञ्चविधः २०७
मन्त्रमूर्तिस्वरूपवर्णनम् २०८
मूर्तिभेदाः २०८
शिवाधारस्वरूपवर्णनम् २०८
तत्त्वप्रासादादिवर्णनम् २०८

सदाशिवमन्त्रस्वरूपनिर्देशपुरःसरं मन्त्राणां फलम् २०९
पञ्चविधपञ्चाक्षरमन्त्रस्य वर्णनम् २०९
अष्टाक्षरमन्त्रस्वरूपकथनम् २१०
नवाक्षरमन्त्रस्वरूपकथनम् २१०
दशबीजमन्त्रस्य स्वरूपकथनम् २११
महेशमन्त्रस्य सृष्टिस्थितिसंहारबीजानां स्वरूपकथनम् २११
उमादिशक्तिमन्त्राणां कथनम् २१३
मन्त्रन्यासविधिः २१३
तत्त्वन्यासविधिः २१४

षष्ठः पटलः

प्रणवस्वरूपम् २१५
प्रणवभेदाः २१५
अकारोकारमकारादीनां ब्रह्मविष्ण्वादिस्वरूपवर्णनम् २१५
साकल्यस्वरूपकथनम् २१५
शाम्भवस्वरूपम् २१५
सौख्यस्वरूपम् २१५
सावश्यस्वरूपम् २१६
सायुज्यस्वरूपम् २१६
साकल्यादिप्रणवस्य मात्राऋषिच्छन्दसां विवरणम् २१६

सप्तमः पटलः

पञ्चब्रह्मस्वरूपलक्षणकथनम् २१७
सद्योजातादीनां कलासम्बन्धः २२३
तेषां स्वरूपवर्णनम् २२३

अष्टमः पटलः

अङ्गभेदाः २२५
अङ्गनामानि २२५
शिवाङ्गनामानि २२५
शिवाङ्गादीनां लक्षणम् २२५
सामान्याङ्गानां वर्णनम् २२९
तेषां वर्णानां निर्देशः २२९
सौम्यस्वरूपवर्णनम् २२९
विशेषाङ्गनामानि २३०
केवलज्ञानजयोगजभूतजवर्णनम् २३१

कामदानां तत्स्थाननिर्देशपुरःसरं स्वरूपवर्णनम् २३१
शिवाख्यादिपञ्चाम्नायनामानि तेषां स्वरूपं च २३२

नवमः पटलः

मन्त्रजातस्य स्वरूपम् २३३
मन्त्रमयलिङ्गयन्त्रस्य विवरणम् २३४
पीठस्य षडङ्गवर्णनम् २३४
षडङ्गेषु मन्त्रन्यासविधिः २३५
आधारषट्केषु क्रमेण मन्त्रन्यासस्वरूपम् २३५
स्थूलपञ्चाक्षरन्यासः २३५
षडध्वन्यासः २३५
अतिबालसबालादिमन्त्राणां स्वरूपकथनम् २३५
बासवाहनस्वरूपम् २३५
सबालादीनां स्वरूपवर्णनम् २३६
मन्त्रजातस्य स्त्रीपुंनपुंसकत्वादिवर्णनम् २३६
मन्त्रस्वरूपवर्णनम् २३६
मन्त्रवासस्य कथनम् २३७
मन्त्रावाहनकथनम् २३७

दशमः पटलः

शिवमुद्रासु श्रद्धा कर्तव्या २३८
चतुर्विधशैवभेदः २३८
सामान्यशैवलक्षणम् २३८
मिश्रशैवलक्षणम् २३९
शुद्धशैवलक्षणम् २३९
वीरशैवलक्षणम् २४०
वीरशैवभेदाः २४०
वीरसामान्यलक्षणम् २४१
वीरविशेषलक्षणम् २४१
निराभारिवीरशैवलक्षणम् २४१
वीरशैवमहेश्वराणां सामान्यमतनिरूपणम् २४१
शुद्धशैवलक्षणादिकम् २४२